# संस्कृतवार्ता:

**दिनाङ्क: - 18.12.2024** **सायम् - 06:20**

| |
|---|
| **इयम् आकाशवाणी** |
| **सम्प्रति वार्ताः श्रूयन्ताम्** |

**<u>मुख्यवार्ताः</u>**

- **केन्द्रीय-गृहमन्त्रिणा अमितशाहेन डॉ. भीमराव-अम्बेडकरवर्यस्य अवमानना कृतेति व्याजेन कृत-विपक्षीणां कोलाहलेन अद्यापि संसद: सदनद्वयो: कार्यजातम् आदिवसं स्थगितम्।**
- **प्रधानमन्त्रिणा नरेन्द्रमोदिना अम्बेडकरवर्यस्य अवमाननेति प्रकरणे गृहमन्त्रिण: पक्षं स्वीकुर्वता कांग्रेसदलस्योपरि प्रतिप्रहारो विहित:।**
- **राष्ट्रिय-सुरक्षा-परामर्शद: अजीतडोभाल: चीनदेशेन-सह सम्वादाय बीजिंग नगरे अस्ति, यत्र स: चीनदेशस्य विदेशमन्त्रिणा वांग यी इत्यनेन सह महत्वपूर्णेषु द्विपक्षीयविषयेषु चर्चां विधास्यति।**
- **भारतस्य पूर्णक्रिकेट-क्रीडकः रविचन्द्रन-अश्विनः अन्ताराष्ट्रिय-क्रिकेट्-क्रीडायाः संन्यासस्य घोषणां कृतवान् ।**
- **क्रिकेट्-क्रीडायां ब्रिस्बेन्-नगरस्य गाबायां, बोर्डर-गावस्कर-ट्रॉफीति-क्रीडायाः तृतीया क्रीडा वर्षायाः कारणेन नाटकीयतया अनिर्णिता जाता।**

---------------------------------------

**संसद: गतिरोध:**

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन डॉ. भीमराव-अम्बेडकरवर्यस्य अवमानना कृतेति व्याजेन कृत-विपक्षीणां कोलाहलेन अद्यापि संसद: सदनद्वयो: कार्यजातम् आदिवसं स्थगितम्। विपक्षस्य व्यवहारे स्वकीयाम् आपत्तिं प्रकटयन् संसदीय कार्यमंत्री अर्जुनराम-मेघवाल: उक्तवान् यत् –

लोकसभायाम् यदा सदस्या: द्विवादने प्रथमस्थगनानन्तरम् पुन: सम्मिलिता: तदा नैके विपक्षीसदस्या: गृहमन्त्रिण: क्षमायाचनां याचन्त: उद्घोषवन्त: अभवन्। तदनन्तरं आदिवसं सभा स्थगिता जातेति पीठासीनाधिकारिणा घोषिता। तथैव हि राज्यसभायामपि अभवत्, येन राज्यसभाध्यक्षेण श्रीजगदीपधनखड़ेन राज्यसभा पूर्णदिवसाय स्थगिता।

---------------------------------------

**प्रधानमंत्री-कांग्रेस-अम्बेडकर**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अम्बेडकरवर्यस्य अवमाननेति प्रकरणे गृहमन्त्रिण: पक्षं स्वीकुर्वता कांग्रेसदलस्योपरि प्रतिप्रहारो विहित:। तेनोक्तं यत् श्रीशाह: अम्बेडकरवर्यस्य अवमाननां न करोति स्म, अपितु कांग्रेसदलस्य कृष्णैतिह्यं प्रकटयति स्म। स: आरोपितवान् यत् कांग्रेसदलं गृहमन्त्रिण: उक्तिभि:, तथ्यैश्च पूर्णत: स्तब्धमस्ति, अस्मादेव कारणात् तद्दलं सम्प्रति नाट्यमभिनयतीति।

---------------------------------------

**अजितडोभाल/चीनमेलनम्**

राष्ट्रिय-सुरक्षा-परामर्शद: अजीतडोभाल: चीनदेशेन-सह सम्वादाय बीजिंग नगरे अस्ति, यत्र स: चीनदेशस्य विदेशमन्त्रिणा वांग यी इत्यनेन सह महत्वपूर्णेषु द्विपक्षीयविषयेषु चर्चां विधास्यति। एतेषु विषयेषु प्रामुख्येन वास्तविकनियन्त्रणरेखायां शान्तिसौहार्दयो: सुस्थापनेन

सह द्विपक्षीय-सम्बन्धानां पुनर्स्थापनमस्ति, यद्धि पूर्वीलद्दाखक्षेत्रे सैन्यगतिरोधत्वात् गतचतुर्भ्य: वर्षेभ्य: बाधितोऽस्ति। श्रीडोभाल: भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं कुर्वन् विशेषप्रतिनिधीनां त्रयोविंशतितमायां चर्चायां भागग्रहणाय बीजिंगनगरं सम्प्राप्तोऽस्ति, चर्चैषा पञ्चवर्षानन्तरं समारभते।

------------------------------------

<u>प्रधानमन्त्री/अण्डमान-निकोबार</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य निगदितं यत् अण्डमाननिकोबारस्थानां द्वीपानां नामानि राष्ट्रनायकानां नाम्नि प्रतिस्थापनम् एतत् सुनिश्चयति यत् राष्ट्रं प्रति कृत-तेषां सेवा: भाविनागरिका: सश्रद्धया स्मरेयुरिति। सामाजिक-प्रसारतन्त्रजाले सन्देशमेकं सम्प्रसारयन् प्रधानमन्त्री उक्तवान् यत् यानि राष्ट्राणि स्वमूलै: सह सम्बद्धानि भवन्ति, तानि राष्ट्राणि विकासे, सुराष्ट्रनिर्माणे च अग्रे गच्छन्ति। प्रधानमन्त्रिणा उक्तं यत एतत् राष्ट्रस्य स्वातन्त्रयवीराणां, तेषां पुण्यस्मृतजनानां स्मृते: संरक्षणस्य, सम्मानस्य च राष्ट्रकृत महत्प्रयासस्य भागभूतमस्ति, यै: अस्मद्देशस्य उपरि अप्रौञ्छ्यं टङ्कणं टंकितम्।

------------------------------------

<u>रेलवे- कुम्भमेला</u>

महाकुम्भमेलापके यात्रिणां कृते निःशुल्कयात्रायाः अनुमतिः भविष्यतीत्यस्मिन् विषये अद्य सर्वकारेण वार्ता वाहिन्याः वार्ता-पत्राणाञ्च अपुष्टाः वार्ताः खण्डिताः। रेलमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् भारतीयरेलवेविभाग: एतेषां अपुष्ट-वार्तानां खण्डनं करोति, प्रसारिताः वार्ताः सर्वथा निराधाराः भ्रामिकाश्च सन्तीति।

-------------------------------------

**सेबी-आ विनियमा:**

भारतीयप्रतिभूतिविनिमयमण्डलेन (सेबी) इत्यनेन अनिवार्य कृतं यत् निवेश परामर्शं दातुम् इच्छुकः कोऽपि जनः निवेशपरामर्शविनियम- त्रयोदशोत्तर द्विसहस्रम् इत्यन्तर्गतं योग्यः पञ्जीकृतः च भवितुमर्हतीति। सेबी इत्यनेन, भौमवासरे भारते निवेशपरामर्शदातॄणां कृते मानदण्डान् कठिनीकर्तुं प्रस्तावितानि संशोधनानि प्रकाशितानि। संशोधने निवेशपरामर्शप्रदाने एआइ-इत्यस्य उपयोगस्य विषयेऽपि उक्तमस्ति। इमानि संशोधनानि ग्राहकदत्तांशस्य सुरक्षा, गोपनीयता, अखण्डता च, प्रदत्त परामर्शस्य स्पष्टता विषये च निवेशपरामर्शदातॄणाम् उपरि उत्तरदायित्वं प्रतिस्थापयन्ति।

-------------------------------------

**निर्वाचनआयोगः-दिल्ली निर्वाचनम्**

निर्वाचनआयोगेन अद्य आगामिवर्षस्य आरम्भे दिल्लीविधानसभानिर्वाचनस्य सज्जतायाः विषये उपवेशनं कृतम्। आयोगेन दिल्लीमुख्यनिर्वाचनपदाधिकारिभिः आरक्षिप्रशासनाधिकारिभिः सह संवादो विहितः। सप्ततिसदस्यात्मिकायाः दिल्लीविधानसभायाः कार्यकालः आगामिवर्षस्य फरवरीमासस्य त्रयोविंशतिः दिनाङ्के समाप्तिं याति। निर्वाचनस्य घोषणायाः पूर्वमेव शासनारूढ: आपदलं सर्वेषां विधानसभासनानां कृते प्रत्याशिनः नामानि प्रकाशितवत्, काङ्ग्रेस दलेन निर्वाचनाय एकविंशतिः प्रत्याशिनां नामानि घोषितानि। भाजपादलेन अधुनापि स्वस्य प्रत्याशिनां नामानि न घोषितानि।

-------------------------------------

**ऋतुविभाग-मौसम**

भारतस्य ऋतुविज्ञानविभागेन आईएमडी इत्यनेन आगामिषु पञ्च वा सप्त दिवसेषु सम्पूर्णे उत्तरभारते शीततरङ्गस्य स्थितिः स्थास्यतीति पूर्वानुमानं कृतमस्ति। एतादृशीणां ऋतुस्थितीनां प्रसारार्थं नूतनः पश्चिमविक्षोभः, निम्नस्तरीयः प्रेरितः चक्रवातीयः सञ्चारः च कारणमस्ति। आकाशवाण्या सह वार्तालापं कुर्वन्ती आईएमडी इत्यस्य वैज्ञानिका सोमा-सेन-रायः प्रोक्तवती यत् उत्तरपश्चिम-मध्यभारतस्य केषुचित् भागेषु न्यूनतमं तापमानं किञ्चित् अपचितुमपि शक्नोति।

सा अग्रे अवदत् यत् उत्तरतटीयतमिलनाडु, तटीय-आन्ध्रप्रदेशः, रायलसीमा-नगरस्य समीपस्थेषु क्षेत्रेषु च अद्य प्रचण्डवृष्टिः सम्भाविताऽस्ति।

------------------------------------

## शतरंज – प्रणव वेंटकटेश:

चतुरङ्गक्रीडायां भारतस्य प्रणववेङ्कटेशः ह्यः स्लोवेनियादेशे FIDE World Under-18 Youth Rapid अथ Blitz इत्येतत् पदकद्वयं विजित्य कीर्तिमत् स्थापितवान्। चेन्नैनगरस्य भारतीयः ग्रैण्डमास्टर इति क्रीडकः रैपिड् इत्यस्मिन् द्रुतवर्गे विजयं प्राप्य नव दशमलव पञ्च अंकानि सम्प्राप्य स्वर्णपदकं विजितवान् ।

------------------------------------

## क्रिकेट्-क्रीडायां ब्रिस्बेन्-नगरस्य

क्रिकेट्-क्रीडायां ब्रिस्बेन्-नगरस्य गाबायां, बोर्डर-गावस्कर-ट्रॉफीति-क्रीडायाः तृतीया क्रीडा वर्षायाः कारणेन नाटकीयतया अनिर्णिता जाता। पञ्च-क्रीडाशृङ्खलायां सम्प्रति एकैकं द्वन्द्वं विजित्य उभे दले समाने स्तः। अग्रिमा निकष-स्पर्धा मेलबर्न्-नगरे डिसेम्बर्-मासस्य षड्विंशतिः दिनाङ्कतः आरप्स्यते। अस्याः अनिर्णित निकष-क्रिकेट-क्रीडायाः अनन्तरं

**भारतस्य पूर्णक्रिकेट-क्रीडकः रविचन्द्रन-अश्विनः अन्ताराष्ट्रिय-क्रिकेट्-क्रीडायाः संन्यासस्य घोषणां कृतवान् ।**

**।।इति वार्ता:।।**